# Kirata Ashtakam

# કિરાતાષ્ટકમ્

## Document Information

Text title : kiraaTaaShTakam

File name : kiraataashtakam.itx

Category : aShTaka, deities_misc, ayyappa

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# કિરાતાષ્ટકમ્

॥ શ્રીઃ ॥

શ્રીગણેશાય નમઃ । કિરાતશાસ્ત્રે નમઃ ॥

અથ કિરાતાષ્ટકમ્ ।

પ્રત્યર્થિ-વ્રાત-વક્ષઃસ્થલ-રુધિરસુરાપાનમત્તા પૃષત્કં
ચાપે સન્ધાય તિષ્ઠન્ હૃદયસરસિજે મામકે તાપહં તમ્ ।
પિમ્ભોત્તંસઃ શરણ્યઃ પશુપતિતનયો નીરદાભઃ પ્રસન્નો
દેવઃ પાયાદપાયાત્ શબરવપુરસૌ સાવધાનઃ સદા નઃ ॥ ૧॥

આખેટાય વનેચરસ્ય ગિરિજાસક્તસ્ય શમ્ભોઃ સુતઃ
ત્રાતું યો ભુવનં પુરા સમજનિ ખ્યાતઃ કિરાતાકૃતિઃ ।
કોદણ્ડક્ષુરિકાધરો ઘનરવઃ પિઞ્છાવતંસોજ્જ્વલઃ
સ ત્વં મામવ સર્વદા રિપુગણત્રસ્તં દયાવારિધે ॥ ૨॥

યો માં પીડયતિ પ્રસહ્ય સતતં દેહીત્યનન્યાશ્રયં
ભિત્વા તસ્ય રિપોરુરઃ ક્ષુરિકયા શાતાગ્રયા દુર્મતેઃ ।
દેવ ત્વત્કરપઙ્કજોલ્લસિતયા શ્રીમત્કિરાતાકૃતેઃ
તત્પ્રાણાન્ વિતરાન્તકાય ભગવન્ કાલારિપુત્રાઞ્જસા ॥ ૩॥

વિદ્ધો મર્મસુ દુર્વચોભિરસતાં સન્તપ્તશલ્યોપમૈઃ
દૃપ્તાનાં દ્વિષતામશાન્તમનસાં ખિન્નોઽસ્મિ યાવદ્ભૃશમ્ ।
તાવત્ત્વં ક્ષુરિકાશરાસનધરશ્ચિત્તે મમાવિર્ભવન્
સ્વામિન્ દેવ કિરાતરૂપ શમય પ્રત્યર્થિગર્વં ક્ષણાત્ ॥ ૪॥

હર્તું વિત્તમધર્મતો મમ રતાશ્ચોરાશ્ચ યે દુર્જનાઃ
તેષાં મર્મસુ તાડયાશુ વિશિખૈસ્ત્વત્કાર્મુકાન્નિઃસૃતૈઃ ।
શાસ્તારં દ્વિષતાં કિરાતવપુષં સર્વાર્થદં ત્વામૃતે
પશ્યામ્યત્ર પુરારિપુત્ર શરણં નાન્યં પ્રપન્નોઽસ્મ્યહમ્ ॥ ૫॥

યક્ષપ્રેતપિશાચભૂતનિવહા દુઃખપ્રદા ભીષણાઃ
    બાધન્તે નરશોણિતોત્સુકધિયો યે માં રિપુપ્રેરિતાઃ ।
ચાપ-જ્યા-નિનદૈસ્ત્વમીશ સકલાન્ સંહૃત્ય દુષ્ટગ્રહાન્
    ગૌરીશાત્મજ દૈવતેશ્વર કિરાતાકાર સંરક્ષ મામ્ ॥ ૬॥

દ્રોગ્ધું યે નિરતાઃ ત્વમદ્ય પદપદ્મૈકાન્તભક્તાય મે
    માયાછન્નકળેબરાશ્રુવિષદાનાદ્યૈઃ સદા કર્મભિઃ ।
વશ્યસ્તમ્ભનમારણાદિકુશલપ્રારમ્ભદક્ષાનરીન્
    દુષ્ટાન્ સંહર દેવદેવ શબરાકાર ત્રિલોકેશ્વર ॥ ૭॥

તન્વા વા મનસા ગિરાપિ સતતં દોષં ચિકીર્ષત્યલં
    ત્વત્પાદપ્રણતસ્ય નિરપરાધસ્યાપિ યે માનવાઃ ।
સર્વાન્ સંહર તાન્ ગિરીશસુત મે તાપત્રયૌઘાનપિ
    ત્વામેકં શબરાકૃતે ભયહરં નાથં પ્રપન્નોઽસ્મ્યહમ્ ॥ ૮॥

ક્લિષ્ટો રાજભટૈસ્તદાપિ પરિભૂતોઽહં ખલૈર્વ્યરિભિઃ
    ચાન્યૈર્ઘોરતરૈર્વિપજ્જલનિધૌ મગ્નોઽસ્મિ દુઃખાતુરમ્ ।
હા હા કિઙ્કરવૈ વિભો શબરવેષં ત્વામભીષ્ટાર્થદં
    વન્દેઽહં પરદૈવતં કુરુ કૃપાનાથાર્તબન્ધો મયિ ॥ ૯॥

સ્તોત્રં યઃ પ્રજપેત્ પ્રશાન્તકરણૈર્નિત્યં કિરાતાષ્ટકં
    સ ક્ષિપ્રં વશગાન્ કરોતિ નૃપતીનાબદ્ધવૈરાનપિ ।
સંહૃત્યાત્મવિરોધિનઃ ખલજનાન્ દુષ્ટગ્રહાનપ્યસૌ
    યાત્યન્તે યમદૂતભીતિરહિતો દિવ્યાં ગતિં શાશ્વતીમ્ ॥ ૧૦॥

ઇતિ કિરાતાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded by Antaratma antaratma at Safe-mail.net
Proofread by Antaratma, PSA Easwaran

*Kirata Ashtakam*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*